## अथ सर्पसूक्तम्(नवनागस्तोत्रम्

ब्रह्मलोके च ये सर्पाः शेषनागपुरोगमाः।
नमोऽस्तु तेभ्यः सुप्रीताः प्रसन्नाः सन्तु मे सदा।1।
विष्णुलोके ये सर्पाः वासुकीप्रमुखाश्च ये।
नमोऽस्तु तेभ्यः सुप्रीताः प्रसन्नाः सन्तु मे सदा।2।
रुद्रलोके च ये सर्पाः तक्षकप्रमुखास्तथा।
नमोऽस्तु तेभ्यः सुप्रीताः प्रसन्नाः सन्तु मे सदा।3।
खाण्डवस्य तथा दाहे स्वर्गं ये च समाश्रिताः।
नमोऽस्तु तेभ्यः सुप्रीताः प्रसन्नाः सन्तु मे सदा।4।
सर्पसत्रे च ये सर्पाः आस्तिकेन रक्षिताः।
नमोऽस्तु तेभ्यः सुप्रीताः प्रसन्नाः सन्तु मे सदा।5।
प्रलये चैव ये सर्पाः कर्कोटकप्रमुखाश्च ये।
नमोऽस्तु तेभ्यः सुप्रीताः प्रसन्नाः सन्तु मे सदा।6।
धर्मलोके च ये सर्पाः वैतरण्यां समाश्रिताः।
नमोऽस्तु तेभ्यः सुप्रीताः प्रसन्नाः सन्तु मे सदा।7।
ये सर्पाः पार्वतीयेषु दरीसंधिषु संस्थिताः।
नमोऽस्तु तेभ्यः सुप्रीताः प्रसन्नाः सन्तु मे सदा।8।
ग्रामे वा यदि वाऽऽरण्ये ये सर्पाः प्रसरन्ति हि।
नमोऽस्तु तेभ्यः सुप्रीताः प्रसन्नाः सन्तु मे सदा।9।
पृथिव्यां चैव ये सर्पा ये सर्पा बिलसंस्थिताः ।
नमोऽस्तु तेभ्यः सुप्रीताः प्रसन्नाः सन्तु मे सदा।10।
रसातले च ये सर्पा अनन्ताद्या महाबलाः।
नमोऽस्तु तेभ्यः सुप्रीताः प्रसन्नाः सन्तु मे सदा।11।

## अथ नवनागनामस्तोत्रम् –

अनंतं वासुकिं शेषं पद्मनाभं च कम्बलं।
शंखपालं धार्तराष्ट्रं तक्षकं कालियं तथा।1।
एतानि नवनामानि नागानां च महात्मनां। सायंकाले
पठेन्नित्यं प्रातःकाले विशेषतः।2।
तस्मै विषभयं नास्ति सर्वत्र विजयी भवेत्।3।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM